लिखिताः पराः। अतएव तदनादरे दोषाः पाद्मे “तप्तचक्राङ्कितं दृष्ट्वा ये निन्दन्ति नराधमाः। अवलोक्य मुखं तेषां आदित्यमवलोकयेत्”। अग्निपुराणे च दशरथं प्रति हतपुत्रविप्रविलापे। “शिलाबुद्धिः कृता किंवा प्रतिमायां हरेर्मया। किं मया पथि दृष्टस्य विष्णुभक्तस्य कर्हि चित्। तन्मुद्राङ्कितदेहस्य चेतसा नादरः कृतः। येन कर्मविपाकेन पुत्रशोको ममेदृशः”। अथ तप्तमुद्राधारणमाहात्म्यं सौपर्णे “अशुचिर्वाप्यनाचारः सर्वधर्मबहिष्कृतः। प्रतप्तशङ्खचक्राभ्यामङ्कितः पङ्क्तिपावनः”। वाराहे तप्तमुद्राधारणप्रसङ्गे “म्लेच्छदेशे शुभे वापि चक्राङ्को यत्र तिष्ठति। योजनानि तथा त्रीणि मम क्षेत्रं वसुन्धरे!। ब्रह्माण्डे “आयुधैर्वैष्णवैः सर्वैस्तापितैः स्वतनुं यदि। चिह्नयेद्वैष्णवो यस्तु स याति परमां गतिम्”। पाद्मे च “अग्नितप्तं पवित्रञ्च धृत्वा तु बाहुमूलयोः। त्यक्त्वा यमपुरं घोरं याति विष्णोः परं पदम्। हुताग्नितप्तचक्रेण शरीरं यस्य चिह्नितम्। तेन तीर्थानि यज्ञाश्च लभ्यन्ते नात्र संशयः। अग्नितप्तेन चक्रेण ब्राह्मणो बाहुमूलयोः। अङ्कयित्वा जपन्मन्त्रं संसारान्मोक्षभाग्भवेत्। अग्नितप्तेन चक्रेण बाहुमूलेषु लाञ्छिताः। ते सर्वे पापनिर्मुक्ता यान्ति विष्णोः परं पदम्”।

किञ्च “अप्राकृता महात्मानो विष्णुचक्रेण लाञ्छिताः। विष्णुचिह्नविहीनास्तु प्राकृताः पतिताः स्मृताः”। इति अत्र निषेधवचनं निर्मूलं सद्भिरनादृतम्। समूलं यच्च तत् सम्यग्विध्यभावादिना कृततत्परम्। अथ तद्धारणप्रकारः “तप्तमुद्राधारणार्थमुपचारैस्तु पञ्चभिः। कृष्णमभ्यर्च्य संपूज्य चक्रशङ्खौ तथा तपेत्। तत्र मन्त्रः “सुदर्शन! नमस्तेऽस्तु पाञ्चजन्य! नमोऽस्तु ते इति। अग्निमभ्यर्च्य मूलेन हुत्वा चाज्याहुतीः कृती। चक्रशङ्खगदादीनि शस्त्राण्यग्नौ प्रतापयेत्। तत्तन्मन्त्रैर्यथावाह्य तान्यभ्यर्च्य प्रणम्य च। गुरुं कृष्णञ्च संवन्द्य भक्त्या विज्ञापयेदिदम्। उच्छिष्टो भोजनादेव किङ्करः शरणागतः। तप्तचक्रगदादीनि तवाङ्कानीश धारये” इति। अथ चक्रादीनामावाहनादिमन्त्रः। ओं नमो भगवते वासुदेवाय निर्णाशितसकलरिपुध्वजाय भगवन्नारायणकराम्भोरुहस्पर्शदुर्ल्ललिताय। “एह्येहि त्वं सहस्रार चक्रराज! सुदर्शन!। यज्ञभागं प्रगृह्णस्व पूजाञ्चैव नमो नमः। ओं नमो भगवते पाञ्चजन्याय विष्णुशङ्खाय गम्भीरघोरध्वन्याकुलीकृतकौरववाहिनीनाथाय त्रिरेखादक्षिणावर्त्तायातिप्रशस्ताय। एह्येहि पाञ्चजन्य! त्वं नारायणकरस्थित!। यज्ञभागं प्रगृह्णस्व पूजाञ्चैव नमो नमः। ओं रं यं मं नं पाञ्चजन्याय नमः। ओं भगवते खड्गाय नन्दकाय त्रैलोक्यपवित्राय जयिने सकलसुरासुरसुन्दरीनेत्रोत्पलार्च्चिताय। एह्येहि खड्गरत्न! त्वं नन्दकाख्य सुरार्च्चित। यज्ञभागं प्रगृह्णस्व पूजाञ्चैव नमो नमः। ओं खड्गाय नमः। ओं नमो भगवत्यै कौमोदक्यै भगवद्भट्टारकवासुदेवलालितायै। एह्येहि त्वं गदे! देवि! कौमोदक्यायुधेश्वरि!। यज्ञभागं प्रगृह्णस्व पूजाञ्चैव नमोनमः। सशराय शार्ङ्गाय नमः। इति। अथ धारणमन्त्रः। सुदर्शन! महाज्वाल! सूर्य्यकोटिसमप्रभ!। अज्ञानान्धस्य मे नित्यं विष्णोर्मार्गं प्रदर्शय। तथा। पाञ्चजन्य! निजध्वानध्वस्तपातकसञ्चय!। पाहि मां पापिनं घोरं संसारार्णवपातिनम्। इत्यमुच्चारयन् मन्त्रं दक्षिणादिक्रमेण तु। भुजयोश्चक्रपूर्वाणि कृष्णशस्त्राणि धारयेत् कलत्रादिपरीवारान् निजान् सर्वांश्च वैष्णवः। भगवत्यर्पयन् तप्तमुद्राभिस्ताभिरङ्कयेत्”। तथा च वाराहे। “अङ्कये तप्तचक्राद्यैरात्मनोबाहुमूलयोः। कलत्रापत्यभृत्येषु पश्वादिषु च सम्पदे” “किञ्च आयसं विधिवत् कृत्वा पञ्चायुधविधानतः। तत्तन्मन्त्रेण मन्त्रज्ञः प्रतिष्ठाप्य पृथक् पृथक्। ललाटे च गदा धार्य्या मूर्द्ध्नि चापं शरन्तथा। नन्दकञ्चैव हृन्मध्ये शङ्खचक्रे भुजद्वये”। किञ्च। “दक्षिणे तु भुजे विप्रो बिभृयाद्वै सुदर्शनम्। सव्ये च शङ्खं बिभृयादिति ब्रह्मविदो विदुः”। अथ चक्रादिप्रतिकृति द्रव्यम्। नवप्रश्नपञ्चरात्रे “सौवर्णं रजतं ताम्रं कांस्यमायसमेव वा। चक्रं कृत्वा तु मेधावी धारयेत् सुविचक्षणः इति। एवमेव प्रबोधन्यां द्वादश्यां भगवत्परैः। तप्तमुद्रा ध्रुवं धार्य्या द्वारकायां विशेषतः”

तन्निषेधकवाक्यानि वैष्णवेतरविषयाणीति वैष्णवा मन्यन्ते स्मार्त्तास्तु श्रुतिस्मृतिविरुद्धत्वात् एतत् नानुतिष्ठन्ति विस्तरभयात् तन्निषेधवाक्यानि नोद्धृतानि।

**तप्तवालुक** पु० तप्ता वालुका यत्र नरकभेदे नरकशब्दे दृश्यम्।

**तप्तरहस** न० कर्म्म० अच् समा०। तप्ते रहःस्थानभेदे।

**तप्तरूपक** न० नित्यकर्म० शुद्धरजते राजनि०।

**तप्तशूर्म्मिकुण्ड** पु० तप्ता सूर्म्मिः लौहप्रतिमा यत्र